## संस्कृतविभागेन

## दिल्लीविश्वविद्यालयीयेन

समायोज्यते

## द्वादशमन्ताराष्ट्रियं योगदिवसमभिलक्ष्य

### सप्ताहव्यापी राष्ट्रियोऽभ्यासवर्गः

# योगसूत्रं सव्यासभाष्यं समाधिपादमात्रपर्यवसितम्

**विशेषज्ञो विद्वान्**

**आचार्यः कृष्णकान्तः शर्मा**

**प्राक्तनः संकायाध्यक्षो विभागाध्यक्षश्च, वैदिकदर्शनविभागे, संस्कृतविद्याधर्मविज्ञानसङ्कायस्य, बनारसहिन्दूविश्वविद्यालयीयस्य**

ज्येष्ठशुक्लपक्षसप्तमीतः चतुर्दशीपर्यन्तम् (२१-२८ जून, २०२६)

संयोजकः
डॉ. अवधेशप्रतापसिंहः

सहसंयोजकौ
डॉ. सोमवीरसिङ्गलः
डॉ. श्रुतिरायः

समन्वयिका
आचार्या मीरा द्विवेदी
(संस्कृतविभागप्रभारी दक्षिणपरिसरे)

संरक्षकः
आचार्यो भारतेन्दुपाण्डेयः
(विभागाध्यक्षः)

# प्ररोचना

भारतीयसभ्यताया ऐतिह्यम् आत्मज्ञानस्य, आत्मानुशासनस्य आध्यात्मिकानुभूतेश्चान्वेषणेन गभीरतया संयुज्यते। निजरूपवैविध्ये योगोऽस्यान्वेषणस्य स्थेयसीषु अभिव्यक्तिषु अन्यतम आस्ते। यद्यपि बौद्ध-जैन-शैव-प्रभृतिषु अन्यासु दार्शनिकपरम्परासु महत्त्वपूर्णाः यौगिकपरम्पराः विकसिताः बभूवुः, तथापि योगमार्गस्य व्यवस्थिता, प्रभावशालिनी विश्वस्तरे पूजिता च व्याख्या पातञ्जलयोगसूत्रे संहितारूपे समुपलभ्यते।
अस्याः संगोष्ठ्याः अध्ययनं व्यासभाष्येण अभिन्नतया सम्बध्यते यद्धि योगसूत्रस्य प्राचीनतमं प्रामाणिकं भाष्यमास्ते। अयं ग्रन्थः पारिभाषिकशब्दावलीं सम्यग्व्याख्याति परवर्तिव्याख्याश्च प्रभावयति। सहस्राब्दीभ्यः अयं ग्रन्थः योगस्य अवधारणायै साधनायै च सर्वतोभावेन दार्शनिकाधारभूमिरिव विराजमाना विश्वस्य अशेषबुधान् साधकान् जिज्ञासून् च प्रेरयति।

अद्य विश्वस्मिन् जगतीतले योगस्य यापि उल्लेखनीया लोकप्रियता दृश्यते, तस्याः श्रेयोभाजनं भवति पातञ्जलयोगदर्शनस्य बौद्धिकगभीरता, मनोवैज्ञानिकी अन्तर्दृष्टिः आध्यात्मिकी गूढता च। यद्यपि साम्प्रतं योगो नैकरूपेषु प्रचलति, तथापि अस्य मूलं पातञ्जलयोगसूत्रे निहितं वर्तते। चेतना-ध्यान-मुक्ति-सम्बद्धाः एतच्छिक्षाः अद्यापि मानव-कल्याणाय आत्म-विकासाय च कल्पन्ते।

समाधिपादाख्यो योगसूत्रस्य प्रारम्भिकः खण्डः अस्यां परम्परायाम् अतिमात्रं महत्त्वपूर्णं स्थानं भजते। अयं योगस्य प्रकृतिं सोद्देश्यां विवृणोति, मनःकार्यप्रणालीं विविनक्ति तान् सिद्धान्तान् च प्रस्तौति ये चेतनायाः आत्म-जागरूकतायाश्च उन्नताः अवस्थाः यावत् प्रापयन्ति। इत्थमसौ समग्रमपि योग-दर्शनमवगन्तुं सैद्धान्तिकम् अनुभवजन्यम् आधारमाविष्करोति। अतोऽस्य पादस्य गहनमध्ययनं, योगस्य शास्त्रीयं स्वरूपमवगन्तुं तत्परम्परासमृद्धेश्चास्वादनाय च अतिवेलमनिवार्यम्।

मूलतः, एतदभ्यासवर्गस्य प्रयोजनं दर्शनेषु अन्यतमेन योगेन सह गहनसंवादस्य प्रोत्साहनमास्ते। एतल्लक्ष्यं समाधिपादस्य सरलतया गभीराध्ययनमस्ति, सममेव च कल्याण-चेतना-नैतिकता-मानवीयविकास-प्रभृतिषु समकालिकविमर्शेषु पतञ्जलिमुनेः दृष्टेः प्रासङ्गिकतानैरन्तर्येऽपि चिन्तनसंवर्द्धनमस्ति।

वयमस्याभ्यासवर्गस्य विद्वत्तापूर्णयात्रायाः हार्दिकीं घोषणां कुर्मः। अयमिदानीम् एतादृशग्रन्थस्याध्ययनस्यावसरः अस्ति येन प्रायशः सहस्राब्दद्वयात् योग-विमर्शः प्रसारितः यश्चाद्यापि आधुनिकविश्वे आत्म-विकासमार्गं प्रकाशयति।

स्थानम् : कक्षसङ्ख्या ७९, सभागृहम् , प्रथमतलम्, कलासङ्कायः (उत्तरपरिसरः)

**पञ्जीकरणसङ्केतः https://forms.gle/xY8fRqvN97c1ChEM7**

**अथ वा त्वरितप्रतिक्रियाकूटे प्रतिचित्राकर्षं कुर्वन्तु।**

**पञ्जीकरणस्य** अन्तिमतिथिः ज्येष्ठशुक्लपक्षषष्ठी (२० जून, २०२६, अपराह्णम् १ वादनपर्यन्तम्)


**अन्तर्जालसङ्केतः yogasutraworkshop@gmail.com**

डॉ. सोमवीरसिङ्घलः (सहसंयोजकः) 9910286703
डॉ. श्रुतिरायः (सहसंयोजिका) 9868033684

सुश्रीः श्रद्धा अग्रवालः 9999766622
श्रीशिवम् चौधरीः 8800539619


विशेषः

1. अभ्यासवर्गस्य पञ्जीकरणशुल्कं नास्ति।
2. प्रतिसत्रम्  उपस्थितिः अनिवार्या अस्ति।
3. प्रतिभागिभ्य आवाससौविध्यं नैव प्रदास्यते।